दशावतारस्तोत्रम्

{॥ दशावतारस्तोत्रम् ॥}

नमोऽस्तु नारायणमन्दिराय नमोऽस्तु हारायणकन्धराय ।

नमोऽस्तु मत्स्याय लयाब्धिगाय नमोऽस्तु कूर्माय पयोब्धिगाय ।

नमो वराहाय धराधराय नमो नृसिंहाय परात्पराय ॥ २॥

नमोऽस्तु शक्राश्रय-वामनाय नमोऽस्तु विप्रोत्सव-भार्गवाय ।

नमोऽस्तु सीताहित-राघवाय नमोऽस्तु पार्थस्तुत-यादवाय ॥ ३॥

नमोऽस्तु बुद्धाय विमोहकाय नमोऽस्तु ते कल्कि-पयोदिताय ।

नमोऽस्तु पूर्णामितसद्गुणाय समस्त-नाथाय हयाननाय ॥ ४॥

करस्थ-शङ्खोल्लस-दक्षमाला-प्रबोध-मुद्राभय-पुस्तकाय ।

नमोऽस्तु वक्त्रोद्गिर-दागमाय निरस्त हेयाय हयाननाय ॥ ५॥

रमासमाकार-चतुष्टयेन क्रमाच्चतुर्दिक्षु निषेविताय ।

नमोऽस्तु पार्श्वद्वयग-द्विरूपश्रियाभिषिक्ताय हयाननाय ॥ ६॥

किरीट-पट्टाङ्गद-हार-काञ्ची-सुरत्नपीतांबर-नूपुराद्यैः ।

विराजिताङ्गाय नमोऽस्तु तुभ्यं सुरैः परीताय हयाननाय ॥ ७॥

Stotram Digitalized By Sanskritdocuments.org

विदोष-कोटीन्दु-निभप्रभाय विशेषतो मध्व-मुनि-प्रियाय।

विमुक्तवन्द्याय नमोऽस्तु विश्वग्विधूत-विघ्नाय हयाननाय ॥८॥

नमोऽस्तु शिष्टेष्टद वादिराजकृताष्टकाभिष्टुत-चेष्टिताय ।

दसावतारै-स्त्रिदसार्थदाय निशेश-बिंबस्थ हयाननाय ॥ ९॥

नमोऽस्तु पारायणचर्चिताय नमोऽस्तु नारायण् तेऽर्चिताय ॥ १॥

॥ इति वादिराजपूज्यचरण-विरचितं दशावतारस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by N.Balasubramanian bbalu at satyam.net.in

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Dashavatara Stotram 1 (By Vadiraja Theertha) Lyrics in Devanagari PDF
% File name : dashAvatArastotra.itx
% Location : doc_vishhnu
% Author : vAdirAja
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at satyam.net.in
% Proofread by : N.Balasubramanian bbalu at satyam.net.in
% Latest update : June 5, 2006, January 2, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website